विनदेईमन

डॉ. प्रकाश पांडे

Tarrita Real.

Tarrita Real.

विग्रदेईमन्

कवि :
प्रकाश पांडे

प्रकाशिका
सौ. रोहिणी प्रकाश पांडे

प्रकाशिका
सौ. रोहिणी प्रकाश पांडे
अहल्या
दत्तमंदिरस्य पार्श्वतः सोमलवाडा
वर्धा मार्गः, नागपुरम् ४४००२५

मूल्यम्
रु. ५०/-

मुद्रकः
दि. भि. धाक्रस
नाग मुद्रणालयः
रुईकर मार्गः
नागपुरम् २

अनुक्रम:

१. विवेकः
२. नापारयम्
३. रामणीयकम्
४. श्रुणु
५. वृ(ऋ) क्षः
६. अङ्के कुरु
७. यदि
८. परिवर्तनम्
९. महः
१०. किम्
११. यदात्मा
१२. सविता, कातरते!
१३. अनन्तरम्
१४. प्रचुम्ब
१५. अधरकान्तारम्
१६. कवनं ते
१७. यदि वाञ्छसि
१८. दयिते
१९. मनोदयिता
२०. अध्वा-१
२१. अध्वखेदः
२२. आलोकमात्रम्
२३. अध्वा-२
२४. सविता, मातरिश्वा
२५. सौन्दर्यम्
२६. 'संसार'-भामिनी
२७. समर्पय
२८. समुन्मीलति
२९. निरन्तरा
३०. हृदयसम्राज्ञी
३१. विलोपय
३२. सागरम्
३३. सविता
३४. इदानीम्
३५. कान्तकान्ता
३६. अहं पिकः
३७. अलङ्कारः
३८. दयितस्ते
३९. वासना
४०. अरण्यम्
४१. काजलम्, अहं च शुचिः
४२. आत्मकोविदः
४३. अतीतम्
४४. विलोकन-जाङ्गलम्
४५. नभः स्थिरमानसम्
४६. वार्विश्वम्
४७. अविकलीकुरु
४८. समीरणानुभावः
४९. विक्लवात्मा
५०. मा स्पृश
५१. ज्वालावली
५२. तेऽङ्गानि मेऽङ्गानि
५३. यदि
५४. विग्नदेईमन्

अर्पणम्

त्वं देवी सुमनस्यमाना,
हिरण्यशाखा रत्नेभिरलङ्कृता,

त्वमिन्द्रा हिरण्यवपुष्मती,
साकं मे वियद्विहरन्ती विहङ्गमा

रश्मिषु मे त्वं खेलन्ती विकाशसे,
त्वमालम्बनं जीवितस्य त्वरान्वितम्

त्वमाभावरततिरक्षुण्णा पृथिवीव दिव्या
त्वं यज्ञस्थण्डिलात्मता, त्वमाकाशरश्मिकलेवरा

गात्री भुवनानां यात्रिका महःपथाम्
त्वमाकाशदेवता हिरण्यया

त्वं देवी सुमनस्यमाना,
हिरण्यशाखा रत्नेभिरलङ्कृता

विजयादशमी
१९८७

□

चि० सौ० आरती
सप्रेम
प्रकाशमामा

प्रस्तावना

सायकी-तः 'विग्नदेई'मनं' यो मानसपन्थाः (पथोवा) परिचरन्पुरश्चरति, स नूनं लिबिडो(libido, न्यक्चेतः) ईगोम् (ego, अहंकारः) अभिसरति। अयं मे द्वितीयः प्राकाश्यमायातः संस्कृतकाव्य (कविता) सङ्ग्रहः। 'सायक्याः' सकलमेव मानसशास्त्रम्, - कस्याऽपि मानसवेत्तुः स्त्री-पुरुषयुग्मस्य तुहिनं चेतोविश्लेषणम्, चण्डशुभ्राग्निदीपनमिदमनवरतम्, तर्कप्रवाहः, मानसौघश्च।

ततोऽनन्तरं केवलकाव्यात्मतया वैणिकतास्पर्शो नितरामावश्यकः सञ्जातः। यो मया विग्नदेईमनि (विशेषतया पूर्वकवितासु) समालब्धः। किन्त्वत्राऽपीदमवधेयं, यदियं भावनावैणिकता (न तु गानं गीतिर्वेयम, यतोऽत्रं नो वृत्तम्) विह्वलता च कतिपयासु प्रारम्भकवितास्वेव तिष्ठति। यथा यथा कवितास्वेतासु वाचकः पुरःसरति, तथा तथा सहलयमेव मानसोद्वेजनमपि तीव्रतरं संजायते। किन्तु नायमुत्सर्गः। प्रथमा कविता तावदस्मदीयां काव्यविषयिणीं भूमिकां व्यनक्ति, यदनुसारतः काव्यम्, वस्तु (thing, ultimate poetic principle) चेत्यनयोर्मध्य विवेकयितुं न पारयेऽहम्। काव्यतत्त्वम्, अन्तिमं च वस्तु-तत्त्वम्, इत्यनयोर्मध्ये या क्षुरधारा प्रवहति, तस्यामपि च क्षुरधारायां या तेजोधारा, तस्यामेव कविचेतनाऽत्र विग्नदेईमनि संलब्ध-प्रतिष्ठाना। एतत्पूर्वमेवात्रार्पणं 'मनोदेवतायै', - या सुमनस्यमाना, रत्नेभिरलङ्कृता, तस्यै देवतायै कवि-निवेदक-प्रियायै सुविहितम्, या चेतःप्रिया। वैदिकभाषासरणेरत्रा नुसरणमा आधुनिक काव्यसन्दर्भे।

सन्ति केचनानुभवाः, चेतोव्यक्तयो वा, याः सम्पूर्णतयाऽवकलयितुं न सुशम्। एतानेवान-भवानूये केवलमानसिकभ्रान्त : तानधिकृत्य द्वितीया कविता,-'नापारयम्', - शीर्षकिणैवाशयोऽपि विशद एव। 'अनुभूति', विषये याऽद्यतने (महाराष्ट्री) ललित साहित्ये (संस्कृतेत्वियं नास्त्येव, विहाय केषुचन

तेषु तेषु टागोरादिकानाम्, 'अनुवादेषु' !) भ्रान्तिमूला धारणा, तामपसारयति ततः, - 'रामणीय-कम्' । अनुभूतिः यत्र तत्र कुत्राऽपि स्वाभाविके जीवनानुभवे तिष्ठत्येव, - तत्कृते स्वगृहाद्बहिरागमनम्, वर्णनकृते बाह्य-जगतोऽवप्रेक्षणम्, अभ्यासिकाया बहिरात्मनो निष्कासनम्, - नावश्यकम् । यतः सा जीवनानुभवतः, - 'मानस'स्तर एव जीवनानुभवान् ग्रहीष्यतः काऽपि केवलचेतस्का स्थितिः । ततः परं 'वृ(ऋ)क्ष' इति कविता कमपि कूटानुभवं स्पृशति, यमूरीकृत्य, चित्तमपि प्रमुग्धमिति मन्यते नाम मानसम् । ततःपरञ्च सर्वत्रैव निःशेषतया प्रेमकविताः एव, किन्तु काश्चनापवादभूता अप्यत्र दृश्यन्ते । - कॉम्बिनेशन्स वुइथ् कम्पॅशन्, - माय पोएम्स ! कविभूमिकेयम् । Voice of America has ignored the voice of Reason ! – कुहचनानेनैव निरीक्षणेन काचिदन्यमेव विषयमाश्रित्य कवितैकतमा प्रवर्तते । अत्र केवलं सदसद्विवेकबुद्धेर्व्यापारः, न किमपि राजकीयं मतम् कविताः मे, विशेषतया इमाः कविताः, प्रेम, निसर्गः, सविता, आलोकः, इत्यादीनेव विषयीकृत्य, क्वचिन्नत्यक्षतया, क्वचिच्च रूपकेषु प्रतिमासु वा, मदन्तरात्मनि स्थितिमुपेयुष्यः । किन्तु लिरिकलेऽपि वैणिकेऽपि मानसात्मनि, किमपि असुष्ठुत्व - तत्त्वम् किमपि इव्हिल (evil) नित्यमेव दरीदृश्यते, न केवलं कवेश्चेतसि, किन्त्वखिलास्वेव जनतासु ! अस्य इव्हिल (evil) स्य यः संघर्षः(नायञ्च सर्वदैव सामाजिकः), यत्सुष्ठु तेन साकं वर्ततेतराम् यः सविध एव गोचरतामुपेयिवान्तिष्ठति, तमेवाभिलक्ष्य काश्चन चेतःस्थितयोऽपि लिबिडो (libido) मध्ये स्थितिमाप्नुवानाः सन्ति-यथा स्फुरमाणाः विस्फुरन्त्यो वा (व्यथा) स्फुरद-शलाकाः- केवलचेतःस्फुरणानि । एवंविधाः अव्यक्त-भावानामभिव्यक्तिभावेन परिणताः कविताः यदि वाचकोऽपसारयति, तर्हि सः सर्वत्रैवेह प्रेम-कविताकाननेष्वेव मधुझरेषु चरिष्यति । अतः किमपि प्रेमानुकूलमपि जीवन दर्शनमावश्यकम् । एवंविधाः कविताः अनल्पाः । परमेतत्कथयामि

कविवृन्दान्, यदि मे रोमॅन्टिकाः नितरामेव क्वचित्क्वचित्परिवर्जनीयाः, यदीमे स्वीयकाव्य-धारणामेव विषयीकृत्य सदसद्विवेकं धारयन्ति। एवंविधाः पञ्चषाः, सप्त वाऽष्ट वा कविता ईषद्विप्रलम्भ(शृङ्गार) पराः।

अथै वं प्रेमाऽपि किमपि ध्येयम्, यदुपरि नक्षत्रमहम्, इति कवेर्भावनाऽपि एताभ्यः कविताभ्योऽनन्तरं वाचकचेतोदृक्पथं स्प्रष्टुमर्हति। किन्त्विदं न प्रकटभावनं कस्या प्यादर्श (ideal)-अवस्थायाः। इयमवस्था किलोपलवत्, टेबलवत्, आसन्दीवत्, स्थाणुवत् सत्या, यत्किल चाक्षुषे व्यवहारे व्यवहारकोविदेषु नैयायिकेषु, पश्चिमे च जॉनसनकृते सत्यमासीत्, तावदेव सत्यमिद नाम 'केवलचेतस्कं वस्तु' यन्नाम प्रेम! नेयमनुभूतिरयमनुभवः। 'अध्वा-१' इति कवितायामहं दलितानां ध्येयपथेषु विचरामि, विषयोऽस्याः कवितायाः न केवलमधरारुणिमा अपि तु पूतिरपि प्राणानाम्, मनोऽवस्थानाञ्च पूतिपङ्किलाः स्फोटाःस्रोताश्च। 'अध्वखेदः' इति कवितायां तारुण्यापसरः परामृष्टः। 'तथाऽपि सञ्जीवयाम्यात्मानं ते कृते, ते कृते'। 'अध्वानं कामयेऽहं जीवनस्य, यः स्वयमेव क्षितिजम्' इत्यत्र पुनरपि निर्भरशीला ध्येयाकांक्षा संलक्ष्यते। इयमप्यवस्थाऽधुनिकैराङ्लकविभिः सुविदूरमेव परित्यक्ता। 'अध्वा -२' इत्यत्र कवेर्जीवनमार्ग एव कश्चित् सञ्जातः पूतिस्फोटः,-'अध्वा निर्गलितः'। 'सौन्दर्यम्' इति कविता शान्तिमुद्घोषयित्री। 'संसारभामिनी' वियुक्तस्य विप्रयुक्तां प्रियामभिलक्ष्य विद्योतिनी। अयमॉर्फन (orphan, मातृपितृविहीनो बालः) यः समर्पय प्रीतिमिति याचमानस्तिष्ठति, चेतसः कोणगव्हरे तु च संविग्नतया जीवति। निरन्तरा, हृदयसम्राज्ञी, विलोपय, सागरम्, सविता, इदानीम्, कान्तकान्ता, नैकाः कविता, कश्चित्सकला अपि कविताः एवंविधा याभ्योऽनन्तरम्, 'अहम्पिकः' इति कविता पिकं संस्पृश्य पुनरपि कमपि मृदुकं भावं प्रजागरयति। कामानामरणिः कविः, कविरयं वासनानां सविता (सविताऽपि), न मृदुलं पुष्पम्,-

स्वैरगतिरयम्, 'अरण्यम्' जगत्, एकं शून्यमनस्कं चेतस्तत्त्वम्, यत्र सृष्टिरन्तः संस्पृश्यान्तर्यैव तस्थुषी लक्ष्यते, 'निर्गलितपल्लवकातरतामुपेतोऽरण्यसम्भारः' कविनायकोऽयं तथाऽपि प्रेमणि वीरन कामादिषु। अयम्,... 'आत्मकोविदः', ध्येयवाद्यपि, यः किल समुद्गिरति,–

सह्यमहीभृदहं यद्यपि
तथाऽप्यहमस्मि 'हिमाला'
कोविदारकान्तारकोविदः
अहमस्मि 'हिमाला'

परं कविकृते त्वेतदेव न पर्याप्तम् किमपि तत्त्वं कामये, यन्महसामापि परतरम्, जीवनादप्यतीतम् यद्'अतीतम्' इति कवितायां प्रियामुद्दिश्य कथितमस्ति। प्रियाऽप्यस्ति काचन साक्षाद्-'ज्वालामयी,' प्रेमकृते यत्किमपि कर्तुमुद्यता वीरबालैव! 'विलोकन-जाङ्गलम्' इत्यत्र मनोध्वान्तवर्णनम्। एतदनन्तरन्तु याः कवितास्ता भावनानां चण्डश्वेतोष्माणं संस्पृशन्ति,स्पृशन्ति कामप्यवस्थां यां वर्णयितुमप्यस्यां गद्यप्रस्तावनायां न पारयति कविवाणी। 'अतीतम्' इत्यत्र यद्यपि प्रेमजीवनम् तथाऽपि काव्यं जीवन-'तरम्', रामणीयकं च जीवनस्य राम-मूल्यमिति निरणायि कविना निवेदकेनान्तरात्मनि। यथा स्पृष्टमेव, 'विलोकन जाङ्गले' नयनयोर्ध्वान्तजाङ्गले नयनकन्दानेवाधिकृत्य कामपि चेतोजैविकामनुभवसरणिमनुभवतु वाचकः। परं नैकाऽपि कविता वाचकपरा। कविता मे यतोऽस्मिन्सङ्ग्रहे, विशेषतया संस्कृते, वाचकान् वाङ्मयसन्दर्भे घटयितुमीहते, न केवलं तान् रसिकयितुम्। अत्र पन्था मे रोमॅन्टिक महाराष्ट्री-कविभ्यः भिन्नः।

मानसस्य रसनमपि कुत्राऽपि लक्षितम्, यदुपलक्ष्य 'मानसिक्थ'ता इत्यादिभिराविष्करणै र्विग्नदेईमन्नामा लिबिडो (libido), ईगो (ego), - कृष्णकज्जलकृष्णसूर्यः, भुग्नः, विग्नः भूत्वा चेतोभावनमवतरति। एतदेव 'वार्विश्व'मित्युपर्युल्लिखितायां

कवितायाम्, यत्र वैश्विकः पृथ्वीकश्च मानसानुभवः कवेर्मतिपथमालोड्य महापूर इव चेतनायाश्चेतनां व्याप्नोति। चण्डेयं श्वेतज्वाला! 'समीरणानुभावः' इत्यस्यां कवितायां भानुना सह कविचेतसः सम्बन्धं प्रस्थाप्य वियत्समीरणस्य विदारकोऽनुभावः, अनुभवः साक्षाद्येतोजैविकः, नानुभूतिरेव काल्पनिकी, - चेतःस्पन्दमुज्जागरयति। विक्लवात्मनि पङ्केरुहानप्यङ्केकृत्य काऽपि भावनाबधिरतैव निवेदकस्य स्मृतिपथमायाति। 'मा स्पृश' इत्यत्र निवेदकः प्रियां प्रति प्रेम कुर्वन्नपि ध्येयात्मतया तां सुविदूरमपसारयति। यतोऽस्य विग्रहः,– मानसचित्रमपि किमप्यश्मकलेवरं सञ्जातम्। ज्वालावली जीवन्प्रियैवाथ च बृहती सरिद्धाराऽपि, यस्याः सङ्गः साक्षादेव ग्रीष्मेण, उन्मिषतां मूल्यानां प्रतीकेन। 'यदि' इत्यत्र जीवनार्थो विशदः।

अनेन च शुभाशुभातिगो यूडेमोनिको (eudemonic) अनुभवः, यत्र शुभमशुभश्चैकतया, सम्भूय शुभाशुभपरतीरे केनाऽप्यङ्कुरत्वेन परिणमतः, सम्भूयैव च प्रीतिः, प्रगतिः मानवत्वं चानुभावयतः, किमपि सर्वातिशायि प्रश्नचिह्नं चेतसः पुरस्तात् स्थापयतः। काव्यसङ्ग्रहावसानमुपेयुष्यः कविताः भावनानां प्रतिमानिरपेक्षि चित्रम्। केवलमाकूतेराकृतिः (Content suggestion form) - 'चेतोऽन्तरालं वस्तु' - यन्नाम कविता, - काव्यं वा! 'क्षितिजम्', 'जीवनम्', 'जीवनात्म,' 'जीवनार्थः' इत्यादीन्याविष्करणान्यत्र कवितायाः सारमयीं भूमिकां स्पृशन्ति। अस्ति चान्ते, उताहो, अस्त्येव चान्ते, विग्नदेईमन्, - संविग्नभानस्वरूपः प्रीतेर्दिव्यदानवः, य आसीद् 'देईमन्' (deimon) यस्य मानसानुभवः न दिव्यः न चाप्यदिव्यः, अपि तु दिव्यादिव्यस्वरूपः। संविदि पदं कुर्वाणोऽयं ग्रीष्मशिशिरसहो भीष्मानुभव एव काव्यसग्रहेऽस्मिन्नवसाने कामपि विषण्णां विषादमयीं भावनामाव्हयति, उद्भावयति,– अनया च भावना याऽयं सङ्ग्रहः, - विग्न देईमन् - समाप्ति मुपैति। अतो विग्नदेईमन्

इति सङ्ग्रहस्याऽपि शीर्षकम् काव्यतत्त्वादारभ्येदं देईमन् - स्पर्शनम् !
देईमन च काव्यतत्त्वमेव।
इति शम्।

– डॉ. प्रकाश पांडे, डी. लिट्.

विवेकः

नापारयम् काव्यं वस्तु चैतयोर्विवेकयितुम्

किं वस्तु ? ..... किञ्च काव्यम् ?
किं वस्त्वेव काव्यम् ?.... अथवा कान्तारम् ?
यत्र काव्यं प्रसूनम् ?

अथवा काव्यमेव सकलकम् ?
यत्र वस्तु - चेतना समुन्मीलति ?

नापारयं काव्य - वस्तु समाकलयितुम् ?

यत्काव्यम् ..... यच्च वस्तु ?

यदस्तु तदस्तु ..... अनयोर्विवेकः क्षुरधारा....

यत्राहं तेजोधारा.....

□

नापारयम्

नापारयञ्च कविषु वर्तमानम्,
भावनं कवयितुम्....
नापारयञ्जनेषु वर्तमानाम्,
वेदनाम्, व्यथामाकलयितुम्.....

अथवा मुग्ध एव सञ्जातः,
क्वचिन्नमुग्धः, क्वचिदप्रमुग्धः
काननं दानवानामप्यवकाशगतानाम्,
नापारयं निष्कासितुमाकाशकलनयाऽपि मे

□

रामणीयकम्

देवमर्त्योऽहमायुरुदन्वति,
न कामये काव्यकृतेऽनुभूतिम्,
अनुभूतिरेव सलिलमुदारम्,
काव्यसवितुरन्तिमं किञ्चित्,
रामणीयकम्.....

तत्र नास्त्यनुभूतिकृते व्यवसायः,
याऽनुभूतिः सा सार्वत्रिकी,
सैव कविं समालिङ्गति
यथा सलिलं मत्स्यम्.....

□

श्रुणु

अस्ति मे चेतसि 'शून्यं' किञ्चित्,
यन्नाकलयति,.....नाकलयितुं पारयति,
एतत्, तत्.... तच्चैतत्....

तस्माद्भूतोऽस्मि पल्वलम्,
तस्माद्भूतोऽस्यरण्यम्,
यद्यपि मे, मं एव किञ्चन,

कल्हार-काननं महन्महनीयम्.....

□

वृक्षः

तरुरयमृक्षः कूटतया
कटिपार्श्वे निरोद्ध्य नभोऽपि
अवदलयति भुवमपि पदतले
वायुरपि न तिष्ठते नाम चेतोवाही
कः कुत्राऽपीति न समवेक्षते

ऊषरोऽपि मूकतया वाति
तान्येव चिह्नानि तिष्ठन्ति
तत्रैव तत्रैव यत्र त्वं नाऽसि पुनरद्य
न त्वमिहाद्य, - सर्वतः सुविदूरम्
एकमेव कटकम्, ऊषरम्
ममाऽपि च पश्याधस्तात्
चित्तमयि मुग्धमतिमात्रम्

□

अङ्के कुरु

पङ्केरुहमङ्के कुरु नग्नाङ्के, नग्नाङ्के!
उदयास्तौ सूर्याणां यतस्तस्मिन्नङ्के तस्मिन्नङ्के!
व्यवकलय मद्व्यथामवकलय मत्प्रेमाणं प्रेमाणम्!

पङ्केरुहमङ्के कुरु, अङ्केकुरु सवितारम्!
अङ्के कुरु सवितारं मद्दयिते मद्दयिते!

□

यदि

पीयूषं वदनं ते,
पीयूषं कवनं ते यदि,
पीयूषकवनं वदनं ते!

रचय रचयैकमेव तावत्कवनं स्वयम्,
यदध्वन्यध्वनि त्वयाऽनुभूतम्,
तद्रचय! प्रसीद तावत्!

कॉम्बिनेशन्स् विथ कम्पॅशन्! माय् पोएमस्!

□

परिवर्तनम्

शलभासुरवर्त्मा मे पन्थाः सञ्जात आसीत्...
आसीन्मे कवनमपि किमपि गूढदानवं तत्त्वम्....

तदनन्तरम् ?

मया निष्कासितं विश्वं विश्वमपि मच्चेतसः
मया विनिभालितमासील्कूटं विषकूटं मत्पदे
विष्णोर्यत्परमं पदं तत्राऽपि हाऽकूतं विषमेव मन्ये...

निपीय, विनिपीय तद्विषम्

अद्य सञ्जातोऽस्मि देव-कान्तः

अद्य सञ्जातोऽस्मि राका-कृष्णः

वराको य आसं सोऽद्य सञ्जातोऽस्मि ते कृते, महःकृष्णः

□

महः

पीयूषवर्षिणी बाला किम्,
कान्तारादतिरिच्यते ?
कान्तारकातरे कान्ते,
कान्तारं सुन्दरं महः !

□

किम्

किमाऽऽकाशरश्मिः,
कविर्भास्वानहम् ?
किमाकाशगात्रः,
शुभ्ररश्मिर्महाँ अहम् ?

त्वमन्तस्तरङ्गः,
रयोऽहं रयोऽहम् !

□

यदात्मा

अश्मा मे प्रीतिः
अश्मा मे जीवनं जीवनसञ्जीवनम्
कलय कलयाश्मानं भवभूतिकम्,

येन मामवकलयसि,
कलय जीवनम्..... आयुषम्,
आयुर्वृन्दञ्चाकलय,.... ते परितो यद् वर्तते ! तत्.....

यत्राहं ऋषिरेकः,
संवित्कान्तारः,
यत्र हर्म्याणि सीमन्त (वज्रचूर्ण) - कान्तारा मे कवितास्ता अपि,

ता अप्याकलयितुमर्हसि,

त्वमेव, नान्यः कश्चिन्नान्यः कश्चित्,

बालसविते भास्वति,
यदात्मा मे प्रीतिरश्मा मे कविता-सविता

□

सविता, कातरते !

उरसि मे सविता,
चेतसि वक्षसि मे सविता,
सविता कातरते मे देवता,
मे देवते !

सवितृ-चक्रं पूजय पूजयैकं महिमानमेकं कान्तारम्,
यत्र दिव्यो ऋषिरेकः सविता,
भुवि वा दिवि वा राजमानः सविता,

स एको देवः सविता,
कातरते !
स एको देवः सविता !

□

अनन्तरम्

जाने नासीत्स ते भ्राता दुरूहः,
यदा दत्त आसीत्तेन मह्यम्,
ते सङ्केतः, ...भृशं साधारणतया
नापारयं ते सङ्केतमन्वेष्टुम्,
भ्रान्तोऽभूवम्, क्रान्तोऽभूवं जीवनसरितः,
क्रान्त्वा विकलोऽभूवम्, तस्मादनुभवादनन्तरम्.....

□

प्रचुम्ब

धूम्रवर्तिकयैव साकं समुद्वाहो मे सम्पन्नः,
यत्त्वं नैवागमिष्यसि,
नैव मामालिङ्गिष्यसि....

पश्य धूम्रमिमम्
वृत्ताद्वृत्तमिवोद्भिन्नम्,
परामृशन्तमाकाशम्, ... वृन्ताद्वृन्तमिवोद्भिन्नम्....

मदन्तरङ्गाकाशसवितारमपि,
यथा माला शतशतानां घनानामावलीनाम्
अथवा नीहारे गुल्मानां कण्टकरोमाञ्चितानाम्,

तत्त्यज कातरतामिमाम्,
समालिङ्ग माम्, दयिते, विप्रयुक्ते, विप्रलब्धे,
समालिङ्ग माम्,
चुम्ब मदधरं धूम्रव्रणितम्,
स्वैरं प्रचुम्ब

□

अधरकान्तारम्

शतशतानामधराणां कान्तारम्
मदधरं चुम्बति,..... मदधरमालिङ्गति,
अधरीकृत्य मामपि...

सागरमिव समूरीकृतं विवस्वता

तदनलय कवनमिदम्,
अनलय कान्तारमिदम्,
विदलय मत्पार्श्वम्,.... स्कन्धम्,
मदुरःकवचं रुधिरमयम्...

प्रचुम्ब माम्, ...त्वमेव भव भवैकं चुम्बनम्,
त्वमेव भव मे समालिङ्गनम्;
यदा लोलः पतिष्यामि शयनाङ्के,

एकलस्तव कृते!

□

कवनं ते

विस्तारयितृ गगनं मे विस्तारयितृ कवनम्...
विरचय...
अर्पय माम्! अर्पय माम्,..

चल चल चन्द्रयाने! अवकाशयाने!
पश्य सुस्निग्धनीलनक्षत्रगोलाम्, पृथिवीमिमाम्
आकाशे स्पन्दमानाम्..

तिमिरायिते!
चलाथवा कोणाटके,
तन्तुवायदरिद्रायामस्यां, दरिद्रस्यामस्याम्, कक्षायाम्..

त्वमेव मे,
त्वमेव मे,
अनलसप्रेमविरुते!

दयिते! विस्तारय प्रेमाणम्!
प्रेम्णश्च गरिमाणम्...
चन्दिरायमाणवदने!

अर्पयैकमेव तावन्मयि कवनं ते, कवनं ते!

□

यदि वाञ्छसि

देहर्पय विवक्षायाः मयि, टीकायाः मयि,
यदि वाञ्छसि मत्सुमनः प्रेक्षणम्,
मनस उत्प्रेक्षणम्...

अनलय कान्तारम्,
कान्तारय काव्यगरिमाणम्,
कवय, कवय वा किमपि टीका-काव्यम्..

यदि वाञ्छसि मत्समीक्षणम्,
अस्मदुत्प्रेक्षणम्,
त्वामभि,..

यदि वाञ्छसि....

□

दयिते

अहो समुन्मिषत्पक्षाणामावली राजहंसानाम्,
आकाशनक्षत्रमालायिता काचिन्मौक्तिकावली ...!
पश्यैनां गगनं पृणाऽसि भावने,
पश्यानवद्याङ्गि कातरे
पश्योदन्वति नयनयोर्मे विह्वले!

तालीवनञ्च श्यामलपत्राणां काननं काननं मे पत्राणाम्,
यत्त्वया संकलितं ते स्पन्दमाने हृदि प्रिये कातरम्
पश्यानवद्याङ्गि तदेव त्वम्, ... तदेवाहम्...

उत्कीर्णमङ्गारे ते नाम मया हृदङ्गारे,
दृष्टश्च स्वप्नस्ते नित्यो भास्वरो विवस्वानिव कातरे,

आकाशदीपत्वमिता मे काव्यावलिर्मे काव्यकान्तारमध्यस्थपर्वतिका, पर्वताली,

यदुपरि नक्षत्रमेकं प्रेम ते दयिते, प्रेम ते!

□

मनोदयिता

दयिते ! मदात्मदयिते ! मदन्तर्दयिते !
समूरीकुरु माम्, विभूषय,
मदधरं त्वदधराभ्याम्,...काममर्पय माम्,

त्वदनङ्गतरले मानसे !
वीचिमाले ! चेतःस्पन्दकन्दुके !
अर्पय मयि..... त्वदन्तरङ्गमालिङ्ग

आलिङ्ग चेतोहरे !
कुवलयवनशिशिरे ! निरूपय माम्
प्राणय माम् ! अर्पय माम्.....

त्वयि हे दयिते !
अस्मदीय-गगनायिते !
रुचिरे ! स्फीतिमर्पय मयि

भावनाभावलहरीम् ! निःस्पन्दविवस्वत्तल-
लहरीकुलवल्लरीम् !..... कातरे !
हृदयप्रिये ! कमनीयरुचिरे ! मन्मनोदयिते !

□

अध्वा - १

पूतिपङ्किलेनाध्वना गच्छाम्यहम्
बुद्धं सरणं गच्छाम्यहम्,
धम्मं सरणं गच्छाम्यहम्...

वेदना याऽतिदलितानाम्,
सैव मया समूरीकृता,
नान्या काचनाऽपि, नान्या काचनाऽपि

विशाल कक्षकोणाटके 'क्रोटन्'
न मे संमतं कदाचनाऽपि
केवलं दरिद्रोटजस्य छाया मे संमता,
दरिद्रोटजच्छाया मे नासंमता

अध्वा मे कण्टकयुतः,
अध्वा मे तिमिरवासिभिः समेतो दिनमध्येऽपि,
तथाऽप्यनेनैवाध्वना पूतिपङ्किलेन गच्छाम्यहम्,

यदयं क्रान्तिमार्गः, यदयं ध्येयमार्गः, मानवताक्षितिजः

□

अध्वखेदः

अध्वखेदः सञ्जातोऽद्य मे,
जीवनखेदो विना ते,
यत्समर्पयामि स्वस्मिन्नेवात्मानम्...

त्वत्सङ्गकल्पनाभुवने,
कोणाटकतन्तुवायोऽहं दरिद्रः,
'सीमन्त' (वज्रचूर्ण) मयहर्म्यकान्तारेषु परिचरन्,

इव कश्चित्सेवकः, निरर्थः..... अर्थहीनः

परमर्थो मया जित इव किल शब्दार्थः शब्दार्थो,
शबलीकृतदर्पणगतविवस्वत्कान्तारंभूतोऽहम् महः कान्तारम्,
सकलैरपि महोभिरर्पितप्राणायमानोऽहं त्वद्विना त्वत्कृते
अध्वखेदः सञ्जातोऽद्य मेऽध्वखेदः
तथाऽपि सञ्जीवयाम्यात्मानं ते कृते, ते कृते!

□

आलोकमात्रम्

कामनाभिर्वासनाभिः परीतं सम्परीतं जगदिदम्
तत्कामये कामनातीतं किमपि निध्यायन् ब्रह्म केवलम्
छायाभिः परीतं सम्परीतं मे मन इदम् - चेत इदम्
तत्कामये निष्कलम् निरञ्जनं कमप्यालोकमेकम्
आलोकमेकम्

आलोकसवितास्म्यहं शुभ्रो निष्कलो निस्तुलः
न जाने मानमन्यं विहाय सवितारं जगदीश्वरम्
कामये निस्तुलम्, कामये यदकामम्,
यच्छुभ्रं ज्योतिषां ज्योतिस्-,
तत्त्वमेकम्

सस्यमिव तटिनीतीरे जातोऽहमासं निस्तरङ्गम्
जातोऽहमासं कश्मले, तथाऽपि नित्यसवितरि कीलिताध्वा,
अध्वानं कामयेऽहं जीवितस्य, यः स्वयमेव क्षितिजं निस्तरङ्गम्
आलोकमात्रम !

□

अध्वा - २

पूतिस्फोट इव कश्चित्,
अध्वा निर्गलितः,..
न ज्ञातमायुर्,.. न ज्ञातं प्रेमाऽपि,
न ज्ञातं काव्यम्,.. न ज्ञातं वाङ्मयमपि..

न ज्ञातं ज्ञानम्, न ज्ञातानि शास्त्राणि,
न ज्ञातं कर्म,.. नाऽपि ज्ञातं यशः,
यशःपङ्किला जीवन्ति जीवन्ति जीवनमहो पङ्केरुहं मन्यमानाः
कीटाः

नाहमेवंविधो,.
अहमज्ञानी यशसः,
अहमेको मूढः कातरः,

जीविताध्वनः सुविदूरमितो,
कवलितध्वान्तः स्वयं ध्वान्तोहम्,
पूतिस्फोट इव कश्चित्,
अध्वा निर्गलितः,.. जीवनाध्वा निर्गलितः

□

सविता, मातरिश्वा

कुवलयमालाभिः साकूतोऽयं मातरिश्वा, मातरिश्वा..
अनलज्वालाधिरूढोऽयं ग्रीष्मप्रगे ध्यायन्, निदिध्यासंश्च
मातरिश्वा,..

गगनंपूणोऽयं सौरभललितः सवितृ-मातरिश्वा, मातरिश्वा...

ईषच्छुष्कपत्रा वृक्षावल्यः, पतत्पक्षा वृक्षमाला, - विहायसः,
आरक्तकुसुमद्रुमाः, विविधा विग्नदयितां इव प्रेमरक्ता योषित इव,
क्वचिन्निर्झरिकाः, क्वचिल्लघुकुल्याः, क्वचिदिक्षुक्षेत्राणि,

सुललितानि, लालितानीवार्भकाणि मातरिष्वङ्के रिङ्गन्ति..

धरणिरियं साकूतेव वल्लरी पुष्पप्रिया, प्रिय-सरिता,
प्रिय-सविता, प्रियकविता यथा काचिद्वनिता
अहो विस्फुरत्यधरः, अधरीकृतरक्तप्रवालो मे
अहो तेऽप्यधरोऽधरीकृतजम्बूफलरौचिस्, तिग्मकृष्णः
यस्मिन् वागुरा इव सुविराजते रेखाऽरण्यमेकम्,
अहश्चते निकटे, कामं ते दयितः, सकामस्ते सविता

□

सौन्दर्यम्

'Washington has ignored the voice of reason'
तथाऽपि जानेऽहं बुद्धि-निर्ह्रादम्,
यथोम्-उदन्वति,
यथोम्-सवितरि काननदयिते वर्षा-वर्षिणि

नास्त्वस्माकं विरोधः,
अन्ताराष्ट्रीयके राजकारणे केनापि सह,
राष्ट्रेण, राष्ट्रानां पृथिवीगतानाम्

दिव्योऽस्त्वेकः सविता,
एक एव प्रसविता,
सकलविश्वधामा कश्चिदीश्वराणामीश्वरः

पूतः सविता! पूताऽस्तु पृथिवी निखिला सवितृप्रिया,
पूतमस्तु काननमिदमनाविलसौन्दर्यम्,

पृथिवीजनतायाः, शान्तिरस्तु सर्वत्र,
भुवि वा दिवि वा, सकलमस्तु सुन्दरम्, चेतोहरञ्च

□

'संसार' भामिनी

बहु खलु भाषमाणा विभासि,
या मे कान्तारगीतिः,
साऽपि न श्रुता त्वया

या मे त्वदीय-प्रतिमा, साऽपि नो विनिभालिता त्वया,
केवलं राजमानासीः कल्पनासाम्राज्ये

न कदाऽपि करो मे करे परामृष्टः,
न कदाऽपि गीतमपि मे पठितम्,
कुत्राऽपि कोणाटके, मञ्जूषायां वा परित्यक्तम्

'ऑर्फन्' इव अमातृकमपितृकमर्भकमिव
अनेन विग्नः सञ्जातोऽहम्, दारुणाऽसि सखि दारुणाऽसि,

यत्सर्वमपि तद्विस्मृतिपथमितम्, नीतं च त्वया,
संसारे ते,
'संसार'भामिनि.

□

समर्पय

कमनीयते ! मुग्धकातरते !
मे भावं प्रजागरय,
प्रजागरय मे स्वप्नस्पन्दमनाविलम्

जागृहि,
स्वापदयिते,
स्वप्नानां मेऽप्यय्यमरते !

आयाहि मत्पुरः,
सवितृरुपिणि विभास्वरि,
अनाविलां कुरु मे जीवनतटिनीम्

केवलप्रेमरमणीयते !
आचर कमपि महत्तरं स्वप्नमायुषि,
मयि च नक्षत्रशुभे,

प्रीतिम् स्वप्नम् ---महोदारमयि,

समर्पय---

□

समुन्मीलति

अध्वाऽपि मया सुपूजितः,
यथा क्षितिजम्,
अध्वा क्षितिज-सविता

कापुष्पाणि, तृणपुष्पाण्यपि सुपूजितानि,
हृदये कृतानि, चुम्बितानि,
यथा म एवार्भका, बालाः, पुत्राः !

अमृतस्य पुत्रा इमे मे भावाः,
तरङ्गतरला इमे मे भावाः,
मयैवात्मने विनिवेदिताः,

मुग्धकातरतया च किमपि,
अनाकारमानाविलमपि सुपूजितम्,
यथा केनाऽप्यनाकारेण निसर्गकविना

अयमेव मे खल्वध्वा,
अयमेव पन्थाः,
इयमेव लघुरथ्या

यदन्तः क्षितिजं समुन्मीलति

□

निरन्तरा

किमनलयसि लोचने, भामिनि,
कृपां कुरु,--कृपां कुरु
सुतरां धारय कमलमिदम्,
मे विग्रहरूपम्,---अथवा भव भव सुमनोवल्लरी,
मामवलम्ब्य

भव गङ्गा त्वम् भव यमुना त्वम्
निरन्तरं त्वमसि मेऽव्यक्तसरस्वती

अनघतमा काचन नयनयोरतीतपथा,

कामिनी, भांमिनी, (सौ) दामिनी,
मे संसारदाम,
यथा बालस्य कृष्णस्य, ---निरन्तरे!

□

हृदयसम्राज्ञी

किममरैः सह,
संवदन्नासम्,
किममरानेव,
पूजयन्नासम्--- ?

आसमहं सवितृमध्यः,
आसमहमेकोऽणुपुञ्जः,
सुतीक्ष्ण-शक्ति-स्थानमणोरणीयान्,

कश्चिदासमहमयि 'न्यूट्रिनो'
कश्चिदासमहमपि 'कृष्णरन्ध्रम्',
कश्चिदासमहं विवस्वान् वा,

अपारस्य शक्तिमतः,
काव्यमासमहं सृष्टेर्गीतमेकम्,
यत्र त्वम्

त्वमेव यत्र,
स्थितासीः सम्राज्ञी मम चेतसः, हृदयसम्राज्ञी !

1. Nutrino -smallest particle in an atom
2. Black hole - a modern scientific term in universology

□

विलोपय

विहगय मदन्तरङ्गम्,
भव भव पक्षिणी त्वमेका
चञ्चूत्क्षेपं मा कुरु मा कुरु
नाहन्ते नक्षत्रघनोऽस्मि दयितः

शापितोऽस्ति च प्रियया त्वया मदन्तरात्मा
तेऽधरयोरियमनलज्वाला,
तस्यामहमयि काश्चित्स्फुलिङ्गमाला शलभायमाना,
अहमासं माला ते माला तेऽनागससुमनसाम्,

या परित्यक्ता मयैवानघे मयैव,
कस्यचित्कृते ?
तन्मा स्मर मा स्मर माम्यि दयिते,
विलोपनीयं तत्सर्वमपि विश्वम्, प्रेमविश्वम्, रमणीयते;

मदन्तरङ्ग-कर्गजतः, त्वदन्तरङ्ग -कर्गजतः

□

सागरम्

अश्रुतरङ्गय सागरम्,
अनागसं मे स्वप्नं समावेशय,
अनलार्पितविग्रहवनितायाः,
स्मरणं कुरु,----स्मरणं कुरु·
विस्मरेयं न तामपि,
मन्मातरम्
आवयोरनुरागमिममालोकयन्तीम्
सीतेव सा,
सा द्रौपदीव
सा च पतिव्रता,
महन्महनीया प्रकृतिभूता,
राजते, विराजते सुविराजते,
पुनरपि राजिता चाथ भवति माता मातरिश्वनि,
यन्मे स्वप्नस्त्वत्कृते, तस्मिन्नपि
मा तावदश्रुतरङ्गय सागरम्-- अनाकारम्

□

सविता

वियदुदन्वान्---उदन्वद्वियच्च,
द्वयमप्येकमेव सुविदूरेऽऽ
यथा काननं वृक्षवृन्दः....वृक्षवृन्दो वा काननम्

नयने तरङ्गयोदन्वन्तम्;
विनिभालय माम्, अस्मद्हृत्स्थण्डिलम्
पङ्केरुहय,------अङ्के कुरु

देहि वचनम्,--- यत्त्वं मे, अहञ्चत्वम्,
युगान्तं यावत्
यथा चन्द्रसूर्यौ, व्यथाचन्द्रसूर्यौ
वियल्लीनौ,-------अर्भकाविवारुणसुन्दरौ

राजमानौ

वियदुदन्वत्----उदन्वद्वियच्च
त्वमेवैकीभावोऽस्यनयोः,
पुलकितकातरभावः
त्वन्मयोऽहमेकः
समुल्लसितकुसुमानाम्,
एकवृन्दः

□

इदानीम्

उन्नमय्य चिबुकं ते,
न कदाऽपि विनिभालितं नयने ते
न वा स्पृष्टः पीयूषमसृणाङ्कुर इव करस्ते
श्यामः, ----सरोमाञ्चः, सस्वेदः करस्ते दयिते
कंरस्तेऽपि कदाचन

न कदाऽपि स्पृष्टोऽन्तस्ते 'सार्य्याः' कदाऽपि मयाऽनघे
अनरालपक्ष्मनयनयोरश्रुषु वा विनिभालितं मे प्रतिबिम्बम्,
न कदापि शान्तः कान्तो दृष्टस्तेऽपि मया कदाचन

परमद्य कामये, कान्तसहितां कान्ते प्रियां त्वां विनिभालये,
पश्येयं विधुसुन्दरं मधुमण्डलं वदनं ते, वदनं ते
विलीयेयं च चिराय त्वत्सुखे, दयिते, त एव सुखे,
स्वसुखानि निष्कास्य,
यथोदन्वान्विवस्वत्यरुणो वा विवस्वति

□

कान्तकान्ता

कान्तकान्ताऽसि नूनं सञ्जाता,
निरन्तरस्नेहनिष्यन्दिनी
अनरालपक्ष्मण्यश्रु मत्कृते यत्तदपि विनिपीय,

कुत्राऽहम्----सवितुरागांसि स्वीकुर्वन्
आगांसि जनतायाः
अथ च पातालसूकरैत्रासितः
कामकामीकृत ओषधिभिर्मानसिकीभिः,
निरन्तरं ते विस्मरणमङ्गीकृत्य,
स्वस्मिन्नेव जीवन् पङ्किलात्मतया,-----एकलतया

जीवनं विनिपीय पुनस्तृष्णाकुलः,
मृत-भावनाभिरेव साकम्,
क्रीडन्, रास-लीलाम्

विहाय त्वाम्, विहाय त्वामपि या कामिनी सञ्जाताऽसीत् कश्चित्
भामिनी- भवितुमीहमानाऽसीत्
केवलमस्मत्कृते

□

अहम्पिकः

प्रियवसतिं प्रयान्ति तारकाकुलाः
प्रियवसतिश्च हिमकरः प्राणम्
कष्टं दिशतु सुखं विभाकरः
मुद्रय लोचने न हुंकृतिर्विभाव्या

अनिलायते प्राणोदन्वान्
सुखशाखास्थितपारदबिन्दुकला इव खगाः,---खड्गाः,
विनिर्यान्ति सुविदूरं क्षितिजतलमभि
बिम्बानीवादर्शगतानि कृष्णानि
आदर्शवृत्तशकलानि

कलमदनाः श्रोत्रामृतनिःस्यन्दिन्यः
स्वच्छन्दा वियत्सरितः प्रयान्ति कामम्,
सुव्रिदूरं दिशि दिशि विगाहन्ते सरितः,
काननाम्राश्च कूजन्ति पिकवनिताकुलाः, पिकवनिताकुटिलाः,
प्रियबाष्पाम्भोदन्वति चिरं विगाहे,
गाहेऽहम्भूत्वाऽऽदर्शमयो हिमाद्रिरिव

प्राप्तो जनिमिव गाहेऽहं विवंस्वानिव
गाहेऽहं कलपञ्चमरागं विकिरन्मृदुलः
पिक इव कोऽपि रुधिरे स्वकीये वितन्वन्नात्मानं सं
गीतमयं जनिमिव मण्डितमुखमण्डलो विवस्वाँ
पिकवृन्दः कर्बुर

□

अलङ्कारः

शाखानाममृतस्मृतिराशानाममरस्मृतिः,
सौहार्दं प्रथयन्नहमात्माऽहं निस्तुलः
प्राणेश्वरोऽहं प्राणदयिताया मम

अनघस्य वर्त्म चरन्
अनघे एव स्थिररश्मिः,
स्थिरसविताऽहम्;
काव्यवीचिषु तरङ्गायमाणः

विपुलं मे जीवनम्
विपुलसञ्जीवनम्
विपुल-पुष्कल-अनङ्ग-गात्रोऽहम्
पुष्कलायमाण एकोऽपि

शाखास्मृतिरिवाहं ब्रह्मतरोः,
काव्यब्रह्मणि स्थिरवर्त्मा,
कामेभ्योऽतीतोऽहम्
दयितालङ्कारः
मण्डनमपि चिरन्तनम्

□

दयितस्ते

नवनवानि क्षितिजानि,
क्षितिजभास्वराणि स्वप्नानि (स्वप्नाः वा)
मे कृते, ते कृते

अनघस्य कामयिता,
अनघायास्ते रसिकवरो,
काव्येषु लीलाहंसो,
अहंते कृते

ते कृते काव्यं मे,
ते कृते नाट्यं मे,
ते कृते भावनं मे,
अहंते कृते

ते कृते क्षितिजमहम्;
मे कृते च क्षितिजं त्वम्,
कामानामरणिरहम्;
अहंते कृते
दयितस्ते

□

वासना

स्वैरा मे गतिरिव चण्डांशोः, शीतांशोरिव वा,
नभोमण्डलश्चरतः, कस्यचन नक्षत्रस्य
बालाहमेकाकिनी, अहमेव तरुणी, अहमेव युवती,
अहमेवाहंपुरुषः प्रकृतेर्द्रष्टा

स्थानं मे दिवि वा,
प्रस्थानं वा क्षितिजाय,
अथवा नग-राज्ञे
नित्यंभविता मे सविता प्रसविता,
वासनानाम्

अहं वासना मानुषी,
अहं भावना - काव्यर्षिः
अहमेव भास्वानहश्च पुञ्जः,
नक्षत्राणाम्

□

अरण्यम्

अद्य विघटितो नाम स्मरतल्पकल्पनागतो मदनः,
अद्य नीलत्विट्पल्लवैराकूतं मन्मनः,
रहस्यकृतस्नेहो समदिरो भावः,
ताम्यत्यन्तः सुन्दरं भुवि लतावेश्म-कातरः स्मृतिपथः

प्रस्खलल्लीलालापं क्षामनयनं मृण्मयमिव कातरं कान्तारम्

अहमिव शून्यमनस्कं देहयात्रानुरूपं विलुलितं काननम्
श्रमस्वेदखिन्नं चित्रकेलिसदृशनीहारमरण्यमिदम्

सञ्जातं प्रकटितपर्णसम्भारं विगलत्पर्णजालमपि
विषमिव सञ्जातम्, यन्निपीय कवचं मे वक्षसि सञ्जातम्,
रुधिरं रूक्षं राज्ञः कर्णस्य प्रवहति धमनिषु मे,

चिन्ताव्याकुलं महस्तमसोऽप्यपारमपाऽऽरकान्तारम्
कविकुलवेदनासम्भारं व्यथितमिदमरण्यं लतावेश्म
कवलितसकलभावनमिवाऽरण्यमिदं हाऽरण्यमरण्यम्,

सञ्जातो विगलितपर्णो ऋतुरिव ग्रीष्मान्तरोऽयं काननसम्भारः,

विनिर्गलितपल्लवः कातरतामुपेतोऽरण्यसम्भारः.....

□

काजलम्, अहं च शुचिः

काजलं निपीतमद्य मयेति,
कापुरुषोऽहं सञ्जातो मघवत्संनिधे,
अहमात्माऽस्मि चर्चरीपुष्पंधयजीवः
पुष्पपत्त्रिरहं प्रसूनोल्लासवेत्ता

गन्ताऽस्म्याकाशकलेवरमाकाशसवितारमनाविलम्
गन्ताऽस्मि योजनानां ततीनामहमाकाशदीप्रः,
दीप्रः सविता नक्षत्रसलिलकांक्षी

आकांक्षा स्पृशति मे दूरस्थमुदन्वत्तीरम्
आकांक्षा स्पृशति मे नभोललितं लालितं भानुमुदारम्
कांक्षा मे विधुरा, एकका, एकला,

स्पृशति स्पृशति स्पृशत्यहो सवितारम्,

काजलं निपीतमये मया यत्,
तथाऽपि तदप्यहं सञ्जातः शुचिस्फटिकः,

शुचौ सवितृकान्तः.....

□

आत्मकोविदः

सह्यमहीभृदहं केवलो नास्मि, अहमस्मि 'हिमाला'
अहमस्मि यद्यपि महाराष्ट्रजनः
एकोऽहंभारतीयः
अहमस्मि मलयजपङ्कः,
पङ्केरुह - सह - जीवनं जीवनम्
अहमस्मि काव्यकलना -
कोविदः सकलदेशविद्वेशकामः, देशस्वप्नः
पीयूषकादम्बिन्यहम्,
या वर्षति सविधे कान्तारे
अहमस्मि सकलज्ञः,
विश्ववेत्ता भारतीयः
सह्यमहीभृदहंभवभूतिदेशनागरिकः,
पाटलिपुत्रवेत्ताऽहमुज्जयिनीनिवासी,
कश्चिदयि कालिदासः.....
सकलमेवाहं यद्भारतीयम्
सकलमेवाहमाकलितं यदप्यतीत-भारतम्
अहमस्मि सञ्जीवनं जीवनानां नष्टचर्यानाम्
अहमस्मि ते कृते, मत्कृते, सकलस्य कृते,
विश्वकान्तारकोविदः, विश्वयात्री
अहमस्मि रामगिरिः,
अहमस्मि पातालवेत्ताऽर्जुनः,
अहमस्मि सिन्धुकलनादो विभास्वरः,
अहमस्मि जाह्नवी - मन्थर - रयः
सह्यमहीभृदहं यद्यपि, तथाऽप्यहमस्मि 'हिमाला'
कोविदारकान्तारकोविदः,
अहमस्मि 'हिमाला'

□

अतीतम्

गवयोऽस्मि सञ्जातः, अथवा भद्राश्वः,
बर्बरो नास्म्यहम्, अहमेको गन्धर्वः
यदि ते कृते, 'स्मितं'मया,
तर्हि ते कृते न किमपि स्मृतंमया

ज्ञातिकुलास्त्यक्ता मया, ते कृते, ते कृते
अम्भः परिणतिर्या गगने, साऽपि परित्यक्ता मया
यद्यपि काव्याङ्गानि, पठितानि मया ते कृते
तथाऽपि काव्यकृते, सर्वमपि परित्यक्तं मया

सर्वमपि परित्यक्तं मया, ते कृतेऽथ च क्राव्यकृते,
सञ्जातोऽस्मि 'बैरागी,' ते कृतेऽधुनाऽप्यकामोऽहम्,
न कामोऽहं वा, न श्यामोऽहम्, न काम्योऽहं वा,
प्रियस्तव यतः सञ्जातः
न वा रामोऽहमयि, रामभक्तोऽपि सञ्जातस्तु ते कृते

परं रामणीयकं जीवनस्य, 'मूल्यं' रामस्यैव कामये,
मज्जीवनव्यापाराय, किमपि 'ध्येय' मपि कामये,
किमपि तत्त्वं कामये, यन्महसामपि परतरम्,
जीवनादप्यतीतम्, प्रियतमे !

□

विलोकनं - जाङ्गलम्

विलोकितेषु काननं प्रकटितं सकण्टकतरुकम्,
काननम् काननम्

अन्धश्च वर्त्मा जातौ विलोपितप्रकाशोऽवलुप्तध्वान्त
स्तिमिरःमयोऽपि स्वर्भासां काननमयि

जातं निखिलमपि भासुरम्, भास्वरमपि जातमासुरम्,
क्षणैकं च दिविषदां काननं नयने मे, प्रकटितम्

जातमाननं मे विग्नत्रुटितनेत्रम्, काननं काननं काननम्,
सञ्जातं नगरमपि सकलम्,
नगरमपि सकलम्

पुनरपि विनिभालये, भालयामि स्पन्दान्नयनयोः कन्दान्मे पुनरपि प्रेक्षे,
विगाहेऽन्तराले इव, गाहेऽन्तराले इव,
निर्यास्यन्त्यया प्रति लक्ष्यम्,
विश्वमपि लक्ष्यमलक्ष्यं सञ्जातम्,

सर्वमपि काननं गहनं सञ्जातमयोध्वान्तजाङ्गलम्,
कातरकान्तारं सञ्जातम्

□

नभःस्थिरमानसम्

रारास मानसं न मे कदाऽपि विग्नभानमेऽऽऽ
निरन्तरं नवीनकाव्यमेव रे मयाऽर्पितम्
न काव्यमाह्वये कदाऽपि भानमाह्वयामि ते सदैव
मानसिक्थता न हन्त स्वीकृता कदाचन

न वीक्षितं मुदा कदाऽऽऽपि वारुणीतरङ्गितम्
कदाऽपि भालितं सदैव प्रीतिभाजनं तथाऽप्यहम्
तथाऽपि तिग्मता ममैव, मे च भान-रुग्णता
वियुक्तकामिनीकृते सदैव बाष्पमाकुलम्
सदैव पारदास्थिरम्

गुरु, मदश्रु वीक्ष्य रे विगाहसे किमान्तरे
मुदा, मदश्रु वीक्ष्य रे किमीहसेऽस्मदन्तमेव
प्रमुग्धता न मेऽद्य रे परन्तु प्रेम कातरम्
क्षितौ च भास्वर-स्थिरं नभस्ययेऽस्मदान्तरम्,
नभस्ययेऽस्मदान्तरम्

□

वार्विश्वम्

वार्विश्वं वार्विश्वम्, अमरैरपि पददलितस्य मे, वार्विश्वं वार्विश्वम्
देवैरपि गवयैरपि महिषीभिः सूकरैरपि,
पददलितस्येदं वार्विश्वं मे वार्विश्वं वार्विश्वं वार्विश्वम्!
वार्विश्वं हर्म्यतले शयानस्य मे,
वार्विश्वं गगनतलेऽपि शयानस्य, क्षुधितस्य मे,
वार्विश्वं चण्डमरीचे रौचिभुजगीविषमपि विनिपीय तिष्ठतः,
विनाऽन्नं क्षुब्धस्य, समन्मथस्याथ च शान्तस्य चेतःशान्तिकृते,
वार्विश्वमर्थहीननरजन्मनः!
वार्विश्वं विश्वकमले सौरभायमाणस्य मानसे, मानसदयितस्य
मानसचिन्ताकरस्य दिवाकरस्याऽपि, वार्विश्वम्!

वार्विश्वमास्माकीनम्, यूनां पश्चिमदेशानाम्,
वार्विश्वमथोत्तरस्यां दिशि गाहमानानाम्,
वार्विश्वं मानसविज्ञानाम्, वार्विश्वं जञ्जपूकानाम्,
वार्विश्वम्!

□

अविकलीकुरु

क्लिन्नमासीन्मानसं मे, तीर्णमासीद्भानुबिम्बम्
भानुवर्त्मात्मा च दिव्यः कातरोऽप्यासीदयोऽश्मा
गरुत्माँ सलिलात्मा च रयोऽश्मा स्फोटं समेत्योदन्वति
विकल आसीद् विक्लवाङ्गोऽङ्गारवर्ष्मा काव्य-कान्तः

अयोवर्ष्म चेतः पङ्किलंभूत मद्य पङ्किलं रतिपङ्किलम्
न च किञ्चिदपि दिव्यवर्त्मनो दर्शनम्, हा दर्शनम्
असद्भूतमद्य व्योम सकलं करकखण्डैरापूरितम्

आवरुथं भूतं वैकृतस्य तमसो हा भित्त्वा भित्त्वा मानसम्

तन्मानसं शैवलासङ्गमपि सुन्दरीकुरु चेतोऽर्पयित्वा,
भानं प्रजागरय कुरु काव्यकान्तारे भाववर्षाम्, भावनर्षे

प्रगमय मां प्रगमन-तत्त्वान्यप्याहूय परतरं परतीरं गमनाय,
अविकलीकुर्वात्मानमविकलं च मां सकलमपि, विश्वमपि

□

समीरणानुभावः

विच्छुरितान्धकारा कारेयं पश्य सुस्निग्धकान्तभावा भावानाम्,
मानसनाम्नी काचिद्विरहिणोऽपि कुरुते सफलप्रेमाणं प्रेमिकम्
प्रियकरम्

समीरणोऽपि ध्वनति, ध्वनत्यमन्दनिध्वानः,
ज्वलति विद्युद्रेखेव काचिद्धमनिषु सुखसुप्तसुखनिर्ह्रादमयी भावानां
विभावानामाकूतिः

विभावितसमन्ततः स्फुरन्मदनमञ्जरी समुल्लासस्वभावा
प्रवहन्ति सरितो रुधिरेष्वङ्गेष्वङ्गेषु नगराजमरुद्गणप्रियतममरुत इव,
पतङ्गविरुतावलीसद्मरुधिरगात्र्यः, सरितः

कमनीयतैव साच भवति सप्रतिमा, कारा, विशदयति प्रियावदनमण्डलं
नयनयोः पुरतः,
केका-मयूरीव मयूरीपक्षनयनशतशबला, सुखशबला, विनिध्वानमयी मे
श्रवणयोस्तथैव
पुरश्चरति मे सविधे, आवलिरिव सुखसरितामथवेन्द्रनीलमधुरवर्णानां
मरुद्घनानाम्,
गणानाम्

□

विक्लवात्मा

शिल्पमिव मानसमासीत्तद्चित्रमेकम्, चित्रमेकम्
कल्प इवासीद् बोभूयमानः स क्षण एकः, क्षण एकः
नाल्पे सुखमिति च कृत्वा चेतः किमप्याकारि तत्त्वं विवृण्वत्,
निर्गतमिवासीद् वि..... विवृतमिवान्तरङ्गं निस्तरङ्गम्

केवल आसीत्स क्षण एकः, क्षण एककः
कान्तारवर्षिणी च काचिद् विवृण्वती निराकारा, कारा भावना
आकूतिर्यया स्फीतमपि लहरिकुलं सम्भूतं पङ्केरुहस्पर्शकातरम् कातरम्

शिल्पं मे यत्तरणिबिम्बे, विलिखितं मया, मया समुत्कीर्णं तदप्यद्य
विदीर्णम्, विशीर्णम् चिराय सुविदीर्णम्

पङ्केरुहानप्यङ्के कृत्वाऽहमश्मा जातस्ततस्ततो, विकलात्मा, विक्लवात्मा

□

मा स्पृश

पक्ष्माग्रे करतलस्पर्शं सञ्जीवयन्तमश्रुमालाम्
कुरु मा भ्रान्तमश्मकोविदमयि मां तन्वङ्गि माऽस्तु कामस्ते मयि

स्वेदस्ते सपत्नीजनः कामानाम्, भावानाम्, आकूतीनाम्
माऽर्पय मयि विग्रहदयिते विग्रहं मा कुरु कैमर्थ्यमिदं साकं माम्

प्रज्वालय व्योमचरितं प्रदीपय निखिलं यदीहसे कान्तं माम्
मा स्पृश किन्तु मत्कलेवरमिदं मृतमिव वलीमण्डितवदनकम्
प्रकटीकुरु भावमेव मयि, विगाहसे यन्मदीयमान्तरम्
स्वैरं स्पृश बाष्पलेखां मे, मा तु मद्विग्रहं चण्डमिव सवितारम्

अहमस्मि ध्येयार्पितात्मा कश्चन क्रेङ्कारः सवितुरयि, अहमस्मि न
कोकिलो विकिरन् गीतसरितं गीतसरणिं शुष्के ऽस्मिन् कान्तारें,
अहमस्मि केवलो, रूक्षो भावः, केवलो वृक्षः, केवलः सहारा
केवलनिर्दग्धतरुषण्डः पतितोऽन्धकारे, विशालतरेऽध्वनि ध्वान्तः

सञ्जीवय मां केवलं भावैरेव, केवलमाकूतिभिर्मा स्पृश
मा स्पृश मेऽश्मकलेवरम्, मा स्पृश

□

ज्वालावली

क्षमाधरगव्हरेभ्यो निर्ज्वलन्ती सरिदहं ज्वालावली,
अहं कान्तारवह्निकमनीयशिखावली चण्डरश्मिप्रिया,

अहं पक्षिणी ज्वाला - पक्ष - युता ज्वालैव निर्यान्ती गगनप्रिया,
प्रियाऽहं दयिताऽहमाकाशतटिनीतटस्थपर्वतवृक्षमालाकुला

अहं धात्री वेदनानामोङ्कारयात्रिकाऽहं प्रिय-प्रिया
प्रियाऽहं धमनिः स्वान्ताकूतिर् हृदयरुधिरकुल्याऽहं जीवनप्रिया

अहं गान्धारदेशगत 'बुद्ध' प्रतिमाकमनीयता प्रियसङ्गीत
लहरीमरालिका

अहं 'ज्ञा'-त्री व्यथानां कमनीयानां गात्री,
अहं धात्री मच्छिशोरेकतमा माता प्रिया

प्रियाऽहं कान्ताराणाम्, प्रियाऽहं ग्रीष्माणामकलेवराणाम्
अव्यक्तभासां खल्वहंप्रिया

□

तेऽङ्गानि, मेऽङ्गानि

ज्वालावलीकुलविलासमयान्यङ्गानि ते धामन् विश्वधामन्नङ्गानि ते
कलकलविकरालस्वनधाराणां निरन्तरनभअङ्गानिस्वानेकः,
तेऽनरालग्रीवमरालकुलमालाभिलीनानीव
विवस्वन्ते, तेऽङ्गानि धामन्!

धामन् ते चण्डातपरौचिस्तमःस्वदचलानिलसलिलायते रौचिस्ते, रौचिस्ते
ते धामन् लक्षाणां क्षुत्क्षामाणां कांक्षाणामाकांक्षास्वप्नगीतिराकूतिर्धामैवते
तेऽङ्गानि कालमरीचिजालोदन्वत्तिमिरायमाणनीलकलेवरध्वान्तरौचिः
कृष्णस्येव कार्ष्णायसी, श्रमिकस्य!

तेऽङ्गानि धामन् स्वर्मालाभालालङ्करणशीतांशुरौचिस्ते, रौचिस्ते
कोटिकराग्रं कैवलमेकं विवस्वन्, धामन्,
तेऽङ्गानि मे, मेऽङ्गानि ते!

□

यदि

यदि जीवितव्यमेव, तर्हि तथा जीवितव्यम्,
यथा विश्वमपि मदीयमेव, त्वदीयमेव

यदि मर्तव्यम्, तर्हि तथा मरणीयम्
यथा विश्वमपि सकलम्, मदीयमेव, त्वदीयमेव

न गर्हणीयं किञ्चनापि,
नानुकरणीयं किञ्चनापि,
न जेतव्यं किञ्चनापि
जीवितव्यम्, केवलं जीवितव्यम्, तथा,

यथा जीवितं स्यात्, जीवनमयि !

न स्मरणीयं किञ्चनापि,
न विस्मरणीयं किञ्चनापि,
सर्वमपि स्मरणपथे, सहनीयम्, नेतव्यम्
सर्वमपि विस्मरणे विलोपितव्यम्

जेतव्यम्, जीवितव्यम्, तथा केवलं जीवितव्यम्
यथा विश्वमपि सकलं मदीयमेव, त्वदीयमेव

□

विग्न देईमन्

'डेईमना' सीन्मानसे मे यो दिव्यो, योऽदिव्यः
गाहमानं मानसं मे दयिते दयिताकाशदयितमासीद्दयितमासीत्
क्लिन्नगात्री, स्विन्नगात्री, खिन्नगात्री काचिदासीत्,
काव्यवीणामाधुरी मे काचिदेका, एककाऽसीत्

ज्योत्स्नावलीवलयविलयो मानसे मे चान्द्र आसीत्
मानसं मे नैव जातम्, नैव जातम्, कदाऽप्यासीत्

परमेकं चिन्तये यत्, परमद्यापि चिन्तये यत्,
क्षितिजमपि गाहनीयम्, गाहनीयम्, गाहनीयम्
जीवनं मया, 'जीवनात्म,' जीवितव्यम्, जीवितव्यम्
जीवनार्थो जीवितव्यो, जीवितव्यो, जीवितव्यो

डेईमन् आसीन्मानसे मे, यो विग्नः, यो दिव्यो, योऽप्यदिव्यः....

□

समाप्तिः

——→ अयं मे कवितास्वरूपो विग्नदेईमन्

——→ क्षुब्धरत्नाकरमहितोऽयं विधुः

——→ श्यामलकलङ्क्षपा

——→ प्रियतमकातरोऽयं विभुः !

——→ यमभिविरौति गोमायुरुतसहम्

——→ आयुः

——→ स्पृष्टकलेवरोऽयमुदन्वान्

——→ विग्नः कलिलः पङ्किलः

——→ प्रीतिदेईमन् !

□